द्वितीय उदकेन्धनः पर्य्यग्ज्वलनशीलो वाड़वः । तृतीय उभयेन्धनः पर्य्यग्ज्वलनशीलः भुक्तस्याहारस्य रसादिपरिणामनिमित्तश्च विद्युदादिश्च । इति विजयरक्षितोपरि सन्देहभञ्जिका ॥ * ॥ अपिच,—

"मन्दस्तीक्ष्णोऽथ विषमः समश्चेति चतुर्विधः ।
कफपित्तानिलाधिक्यात्तत्साम्याज्जाठरोऽनलः" ॥

तेषां कार्य्यं यथा,—

"विषमोवातजान्रोगान् तीक्ष्णः पित्तनिमित्तजान् ।
करोत्यग्निस्तथा मन्दो विकारान् कफसम्भवान् ॥
समासमाग्नेरशिता मात्रा सम्यग्विपच्यते ।
स्वल्पापि नैव मन्दाग्नेर्विषमाग्नेस्तु देहिनः ॥
कदाचित् पच्यते सम्यक् कदाचिच्च न पच्यते ।
तीक्ष्णाग्निरिति तं विद्यात् समाग्निः श्रेष्ठ उच्यते" ॥

इति माधवकरः ॥ अत्यन्ततीक्ष्णाग्निरेव हि भस्मक उच्यते । स तु आहाराभावे शोणितादीन् धातून् पाचयित्वा आशु मारयति । इति रक्षितः ॥ * ॥ (देहजन्याग्नेः नादोत्पादकत्वं यथा सङ्गीतदर्पणे,—

"आत्मना प्रेरितं चित्तं वह्निमाहन्ति देहजम् ।
ब्रह्मग्रन्थिस्थितं प्राणं स प्रेरयति पावकः ॥
पावकप्रेरितः सोऽथ क्रमादूर्द्ध्वपथे चरन् ।
अतिसूक्ष्मध्वनिं नाभौ हृदि सूक्ष्मं गले पुनः ॥
पुष्टं शीर्षे त्वपुष्टञ्च कृत्रिमं वदने तथा ।
आविर्भावयतीत्येवं पञ्चधा कीर्त्त्यते बुधैः ॥
नकारं प्राणनामानं दकारमनलं विदुः ।
जातः प्राणाग्निसंयोगात्तेन नादोऽभिधीयते"

अग्नेः सर्व्वसाक्षित्वादि यथा रामायणे,—

"त्वमग्ने सर्व्वदेवानां शरीरान्तरगोचरः ।
त्वं साक्षी मम देहस्थस्त्राहि मां देवसत्तम" ।

यथा च भारते,—

"आदित्यचन्द्रावनिलोऽनलश्च ।
द्यौर्भूमिरापो हृदयं यमश्च ॥
अहश्च रात्रिश्च उभे च सन्ध्ये ।
धर्म्मश्च जानाति नरस्य वृत्तम्" ॥

अस्य सर्व्वप्रथमाराध्यत्वं ऋग्वेदस्य सर्व्वप्रथमसूक्ते उक्तं यथा,—"अग्निमीले पुरोहितम्" । इत्यादि । विष्णुः । सूर्य्यः ।) अग्निकोणाधिपतिः । इत्यमरः । चित्रकवृक्षः । रक्तचित्रकः । भल्लातकः । निम्बुकः ॥ पित्तं । स्वर्णं । इति राजनिर्घण्टः ।

अग्निकः, पुं, (अग्नि + सादृश्ये कप्रत्ययः) इन्द्रगोपनामरक्तवर्णकीटः । इति हेमचन्द्रः ॥

अग्निकणः, पुं, (अग्नेः कणः । अग्नि + कण ।) अग्निकणा । स्फुलिङ्गः । इत्यमरः ॥

अग्निकारिका, स्त्री, (अग्नि + कारिका ।) अग्निकार्य्यं । इति हेमचन्द्रः ॥

अग्निकार्य्यं, क्ली, (अग्नि + कार्य्यं ।) अग्नावग्नेर्वा कार्य्यं । हविर्दानादिपूर्व्वकाग्निज्वालनं । तत्पर्य्यायः । अग्नीन्धनं २ अग्नीध्रा ३ अग्निकारिका ४ । इति हेमचन्द्रः ॥ (होमादौ हविर्दानादिपूर्व्वकाग्निज्वालनं । अग्नौ सायं प्रातः समिद्धोमानुष्ठानं । यथा—

"उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः ।
आचारमग्निकार्य्यञ्च सन्ध्योपासनमेव च" ॥

इति मनुः ।)

अग्निकाष्ठं, क्ली, (अग्नि + काष्ठं ।) अगुरु । इति राजनिर्घण्टः ॥

अग्निकुक्कुटः, पुं, (अग्नेः कुक्कुटइव ।) ज्वलदग्निवणोल्का । ज्वलन्त नुड़ा इति ख्यातः । इति त्रिकाण्डशेषः ॥

अग्निकोणं, क्ली, (अग्नेः अग्निदेवेन अधिष्ठितमित्यर्थः कोणं ।) पूर्व्वदक्षिणकोणं । तत्कोणाधिपतिरग्निः । इति ज्योतिषं ॥ यथा हलायुधधृतं,—

"गत्त्वैव तीर्थं कर्त्तव्यं श्राद्धं तत्प्रीतिहेतुकम् ।
पूर्व्वाह्णेऽप्यथवा प्रातर्देशे स्यात् पूर्व्वदक्षिणे" ॥

पूर्व्वदक्षिणे अग्निकोणे । इति प्रायश्चित्ततत्त्वं ॥

अग्निक्रीड़ा, स्त्री, (अग्निभिः क्रीड़ा ।) अग्निखेला । खधूमादित्यागः । आतशवाजीति ख्याता ॥

अग्निगर्भः, पुं, (अग्निः गर्भे अभ्यन्तरे यस्य सः ।) अग्निजारवृक्षः । सूर्य्यकान्तमणिः । इति राजनिर्घण्टः ॥ (शमीवृक्षः । त्रि । अग्नियुक्तगर्भविशिष्टः । यथा,—"अग्निगर्भां शमीमिव" । इति शाकुन्तले ।)

अग्निगर्भा, स्त्री, (अग्निः गर्भे यस्याः सा ।) महाज्योतिष्मतीवृक्षः । इति राजनिर्घण्टः ॥ (शमीवृक्षः ।)

अग्निचित्, पुं, (अग्निं चितवान् स्वयम् इति चि चयने । अग्नौ चेरिति क्विप् तुगागमश्च ।) अग्निहोत्री । साग्निकः । इत्यमरः ॥ (यथा रघुवंशे—

"विदधे विधिमस्य नैष्ठिकं ।
यतिभिः सार्द्धमनग्निमग्निचित्" ।)

अग्निजः, पुं, (अग्नि + जन् + ड ।) अग्निजारवृक्षः । इति राजनिर्घण्टः ॥ (त्रि । अग्निजातमात्रे ।)

अग्निजातः, पुं, (अग्नेः जातः । अग्नि + जन् + क्त ।) अग्निजारवृक्षः । इति राजनिर्घण्टः । (त्रि । अग्निजातमात्रे ।)

अग्निजारः, पुं, (अग्नि + जार, अग्निं जठराग्निं जारयति परिपाकशक्तिं प्रदाय वर्द्धयति जॄ कर्म्मण्यण् इति पाणिनिसूत्रं) औषधविशेषः । अस्य पर्य्यायः । अग्निनिर्य्यासः २ अग्निगर्भः ३ अग्निजः ४ वड़वाग्निमलः ५ जरायुः ६ अर्णवोद्भवः ७ अग्निजातः ८ अग्निजालः ९ सिन्धुफलः १० । अस्य गुणाः । कटुत्वं । उष्णत्वं । कफवायुसन्निपातशूलातिशीतरोगनाशित्वं । पित्तप्रदत्वञ्च । इति राजनिर्घण्टः ॥

अग्निजालः, पुं, (अग्नि + जाल ।) अग्निजारवृक्षः । इति राजनिर्घण्टः ॥

अग्निज्वाला, स्त्री, (अग्नेरिव ज्वाला यस्याः । अग्नेः ज्वाला इति वा ।) जलपिप्पली । धातकीवृक्षः । इति राजनिर्घण्टः ॥ अग्निशिखा ॥ (लाङ्गलिकी ।)

अग्निजिह्वा, स्त्री, (अग्नेः जिह्वा ।) लाङ्गलीवृक्षः । विषलाङ्गला इति भाषा । इति राजनिर्घण्टः ॥ अग्नेः काल्यादिसप्तार्च्चींषि । इति जटाधरः ॥ अग्नेः सप्तशिखाः । तासां नामादिकं सप्तजिह्वशब्दे द्रष्टव्यं ॥ (योगविशेषः । यथा,—

"सप्तषष्ठ्यादितिथयः सोमवारादिभिर्युताः ।
अग्निजिह्वाः सप्त योगा मङ्गलेष्वतिगर्हिताः" ॥

इति । योगशास्त्रे ।)

अग्निदमनी, स्त्री, (अग्नेः जठरानलस्य दमनी ।) क्षुपविशेषः । अस्य पर्य्यायः । वह्निदमनी २ बहुकण्टका ३ वह्निकण्टारिका ४ गुच्छफला ५ क्षुद्रफला ६ क्षुद्रदुःस्पर्शा ७ क्षुद्रकण्टारिका ८ मदेन्द्रमाता ९ दमनी १० । अस्या गुणाः । कटुत्वं । उष्णत्वं । रूक्षत्वं । वातकफगुल्मप्लीहनाशित्वं । रुचिकरत्वं । अग्निदीपनत्वं । हृद्यत्वञ्च । इति राजनिर्घण्टः ॥

अग्निदीपनः, त्रि, (अग्नेः जठरानलस्य दीपनः ।) अग्निवर्द्धकः । जठराग्निकारकौषधविशेषः । यथा रसेन्द्रचिन्तामणौ,—

"पारदामृतलवङ्गगन्धकं,
भागयुग्ममरिचेन मिश्रितम् ।
तत्र जातिफलमर्द्धभागिकं,
तिन्तिड़ीफलरसेन मर्दितम् ॥
वह्निमान्द्यदशवक्त्रनाशनो,
रामवाण इति विश्रुतो रसः ।
संग्रहग्रहणिकुम्भकर्ण-
कामामवातखरदूषणं जयेत् ॥
दीयते तु शणकानुमानतः,
सद्य एव जठराग्निदीपनः" ।
"हरीतकी तथा शुण्ठी भक्ष्यमाणा गुड़ेन वा ।
सैन्धवेन युता वा स्यात् सातत्येनाग्निदीपनी" ॥

इति च भावप्रकाशः ॥

अग्निदीप्ता, स्त्री, (अग्नि + दीप्ता) महाज्योतिष्मतीवृक्षः । इति राजनिर्घण्टः ॥ (त्रि । वह्निज्वलितः । यथा,—"नापि कर्णिकाकारफलकैः बाणैः नापि विषाक्तैः नाप्यग्निदीप्तफलकैः" इति कुल्लूकभट्टः ।)

अग्निदेवा, स्त्री, (अग्निः देवः अधिष्ठात्री देवता अस्या इति) कृत्तिकानक्षत्रं । इति हेमचन्द्रः ॥ (पुं, अग्निदेवः अग्निरूपो देवः । अग्निः देवः अस्य इति विग्रहे त्रि । अग्निपूजकः ।)

अग्निनिर्य्यासः, पुं, अग्निजारवृक्षः । इति राजनिर्घण्टः ॥

अग्निप्रस्तरः, पुं, अग्निजनकपाषाणः । चकमकीर पाथर इति भाषा ॥

अग्निवर्द्धनं, क्ली, (अग्नेः जठरानलस्य वर्द्धनं वृद्धिकारकम् ।) जठराग्निवृद्धिकारकम् । तथा,—

"जीरकं रुचिकृत् स्वर्य्यं गन्धाढ्यं कफवातनुत् ।
पाके च कटुतीक्ष्णोष्णं लघुपित्ताग्निवर्द्धनम्" ॥

इति राजवल्लभः ॥

अग्निभं, क्ली, (अग्निरिव भाति इति । अग्नि + भा + क ।) स्वर्णं । इति राजनिर्घण्टः ॥

अग्निभूः, पुं, (अग्नेर्भवतीति । अग्नि + भू + क्विप् ।) कार्त्तिकेयः । इत्यमरः ॥ (पुरा किल तारकासुरेण उत्पीड़ितानां देवानां रक्षार्थं शिवेन